This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं०
१

॥श्रीगणेशाय नमः॥ हरिः ॐ॥ पवित्रे स्थो वैष्णव्यौ सवि
तुर्वः प्रसव ऽ उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य र
श्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पु
ने तच्छकेयम्॥१॥ चित्पतिर्मा पुनातु वाक्पतिर्मा
पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सू
र्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य य
त्कामः पुने तच्छकेयम्॥२॥ पुनन्तु मा देवजनाः पु
नन्तु मनसा धियः पुनन्तु विश्वा भूतानि जातवेदः १

KKSU LIBRARY
RAMTEK
441 106
M-1403
Dist Nagpur

Acc. No. ~~1732~~. M1403
Title - दंडक (अपूर्ण) [illegible]
Author - ?
Date - ?
Subject - Vedic
folio - 18
Xerox - 55

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनीहिमा॥३॥ यथेमाम्वाचङ्कल्याणीमावदानिज

नेभ्यः॥ ब्रह्मराजन्याभ्याꣳ शूद्रायचार्य्यायचस्वा

यचारणायच॥ प्रियोदेवानान्दक्षिणायैदातुरि

हभूयासमयम्मेकामः समृध्यतामुपमादोनम

तु॥४॥ सत्रस्यऽऋद्धिरस्यगन्मज्योतिरमृताऽअ

भूम॥ दिवम्पृथिव्याऽअध्यारुहामाविदामदेवा॰

न्त्स्वर्ज्योतिः॥५॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्ति

नः पूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह॰ स्वस्तिनोबृहस्पतिर्दधातु॥ भूरसिभूमिरस्यदिति
२ रसिविश्वधायाविश्वस्यभुवनस्यधर्त्री पृथिवी
यच्छपृथिवीन्दृंहपृथिवीम्माहिंसीः ३ आ
जिघ्रकलशम्मह्यात्वाविशन्त्विन्दवःपुनरूर्जा
निवर्त्तस्वसानःसहस्रन्धुक्ष्वोरुधारापयस्वतीपु
नर्म्माविशताद्रयिः ४ महीद्यौःपृथिवीचनऽइम
य्यज्ञम्मिमिक्षताम्पिपृतान्नोभरीमभिः ५ व
रुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्जनीस्थो २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रूसस्यऽकृतसदन्यसिब्रुरुणस्यऽकृतसदनम
सिब्रुरुणस्यऽकृतसदनमासीद ९ धान्यमा
सिधिनुर्हिदेवान्ब्राणयत्वोदानायत्वा व्यानाय
त्वा दीर्घामनुप्रसितिमायुषेधान्देवो वः सविता
हिरण्यपाणिः प्रतिगृह्णात्वछिद्रेणपाणि नाचक्ष
षेत्वामहीनाम्पयोसि ११ याऽओषधीः पूर्वाजाता
देवेभ्यस्त्रियुगम्पुरा मनैनुवभ्रूणामहर्‌शतन्धा
मानिसप्तच १२ परिवाजपतिः कविरग्निर्हव्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं० न्मक्रमीत दधङ्त्कानिदाशुभे १३ याःफलिनी
२ र्य्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः वृहस्प
तिप्रसूतास्तानो मुञ्चन्त्वꣳहसः १४ हिरण्यगर्भः
समवर्त्तताग्रेभूतस्य जातःपतिरेकऽआसीत् सदा
धारपृथिवीन्द्यामुतेमाङ्कस्मै देवायहविषाविधे
म १५ अश्वत्थेवोनिषदनम्पर्णे वोवसतिष्कृ।
ता गोभाजऽइत्किलासथ यत्सनवथपूरुषम् १
६ सुजातोज्योतिषासहशर्म्म वरूथमासदत्स्वः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वासोऽग्ने विश्वरूपं सन्व्ययस्वविभावसो १७
पूर्णादर्वि परापत सुपूर्णा पुनरापत वस्नेव विक्री-
णावहा इषमूर्जं शतक्रतो १८ तदस्तु मित्रावरु
णा तदग्ने शंय्योरस्मभ्यमिदमस्तु शस्तम् अशीम
हि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय १९ म
नो ज्योतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्व
रिष्टं यज्ञं समिमन्दधातु विश्वेदेवास इह मादय
न्तामोम्प्रतिष्ठ २० मनो ज्योतिर्जुषतामाज्यस्येति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं० मनसावाऽइदꣳ सर्वमाप्तन्तन्मनसैवैतत्सर्वमाप्नो
४ तिबृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टन्यज्ञꣳ समिम
न्दधात्विति षडिहदन्तत्सन्दधाति विश्वेदेवासऽ
इहमादयन्तामिति सर्वम्वैविश्वेदेवाः सर्वेणैवै
तत्सन्दधाति सयदिकामयेतब्रूयात्प्रतिष्ठेति २१
एषवैप्रतिष्ठानामयज्ञोयत्रैतेनयज्ञेनयजन्ते सर्व
मेवप्रतिष्ठितम्भवति २२ काण्डात्काण्डात्प्ररोः
हन्तीपरुषः परुषस्परि एवानोदूर्वेप्रतनुसह ४
॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रेण शातेन च २२ चन्द्रमा ऽअप्स्वन्तरा सुपर्णो
धावते दिवि रयिं पिशङ्गं बहुलं पुरुस्पृहꣳ ह
रिरेति कनिक्रदत् २४ यदा वध्नन्दाक्षायणा हि
रण्यꣳ शतानीकाय सुमनस्यमानाः तन्म ऽआ ब
ध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् २
५ आयुष्यं वर्चस्यꣳ रायस्पोषमौद्भिदम् २६
ꣳ हिरण्यं वर्चस्वज्जैत्रायाविशतादु माम् २७ म
नसः काममाकूतिं वाचः सत्यमशीय पशूनाꣳ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० रूपमन्नस्यरसोयशः श्रीः श्रयताम्मयिस्वाहा २७
५ व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम् दक्षि
णाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते २८ तम्प
त्नीभिरनुगच्छेमदेवाः पुत्रैर्भ्रातृभिरुतवाहिरण्यैः ॥
नाकङ्गृभ्णानाः सुकृतस्यलोकेतृतीयेपृष्ठेअधि
रोचनेदिवः २९ आकृष्णे
नरजसावर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च हिर
ण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ इमन्देवाऽअसपत्नꣳसुवध्वम्महतेक्षत्रायमह
तेज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येन्द्रियाय इमममु
ष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीराजासोमो
स्माकम्ब्राह्मणानाꣳराजा २ अग्निर्मूर्द्धादिवः
ककुत्पतिः पृथिव्याऽअयम् अपाꣳरेताꣳसिजि
न्वति ३ उद्बुध्यस्वाग्ने प्रतिजागृहित्वमिष्टापूर्त्ते
सꣳसृजेथामयञ्च अस्मिन्त्सधस्थेऽअध्युत्तरस्मि
न्विश्वेदेवायजमानश्चसीदत ४ बृहस्पतेऽअ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८० तियदर्य्योऽ अर्हाद्द्युमद्विभातिक्रतुमज्जनेषु यद्दी
६ दयच्छवसऽ ऋतप्रजाततदस्मासुद्रविणन्धेहिचि
त्रम् ५ अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिबत्क्ष
त्रम्पयः सोमम्प्रजापतिः ऋतेनसत्यमिन्द्रियंविपा
नꣳशुक्रमन्धसऽ इंद्रस्येन्द्रियमिदम्पयोमृतम्मधु
६ शन्नोदेवीरभिष्टयऽ आपोभवन्तुपीतये शं
य्योरभिस्रवन्तुनः ७ कयानश्चित्रऽ आभु
वदूतीसदावृधः सखा कयाशचिष्ठयावृता ८ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केतुर्ह्नः स्वन्तके त वेपेत्रो मय्याऽ अपेत्रासे समुष
ङ्गिरजायथाः ९ इति समिद्धोमः द्वितीयोध्यायः २
अग्निन्दूतम्पुरो दधे हव्यवाहमुप ब्रुवे देवाँ आ
सादयादिह १ अप्स्वग्ने सधिष्टव सौषधीरनुरु
ध्यसे गर्भे सञ्जायसे पुनः २ स्योना पृथिवि नो भ
वान्नृक्षरा निवेशनी यच्छा नः शर्म सप्रथाः ३ इद
म्विष्णुर्विचक्रमे त्रेधा निदधे पदम् समूढमस्य
पांसुरे स्वाहा ४ महाँ ३ इन्द्रो वज्रहस्तः षो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१० डरीराम्मयिष्ठतु हत्तुपाप्मानंयोस्मीन्द्वेष्टि ५
७ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्चज्यो
तिष्माँश्च शुक्रश्चऽऋतपाश्चात्यꣳहाः ६ प्र
जापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभू
व यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳस्यामप
तयोरयीणाम् ७ आपङ्गौरक्रमीदसदन्मा
तरम्पुरः पितरञ्चप्रयन्त्स्वः ८ ब्रह्मजज्ञानम्प्रथ
मम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः सबुध्न्याऽ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुपमाऽस्य विद्वाः सतश्च योनिमसतश्च विवः

एं त्र्यम्बकं यजाम

हे सुगन्धिं पुष्टिवर्धनम् उर्वारुकमिव बन्धनान्मृ

त्योर्मुक्षीयमामृतात् त्र्यम्बकं यजामहे सुगन्धिम्पु

ष्टिवर्धनम् उर्वारुकमिव बन्धनादितो मुक्षीय

मामुतः १ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पा

र्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् इष्णन्निषा

णमुम्म इषाण सर्वलोकम्म इषाण १ यद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं० क्रन्दः प्रथमं जायमानः उद्यन्त्समुद्रादुत वा पुरी
८ षात् श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यम्म
हिजातन्ते ऽअर्वन् २ विष्णोरराटमसि विष्णोः
श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णव
मसि विष्णवे त्वा ४ आ ब्रह्मन्ब्राह्मणो ब्रह्म
वर्चसी जायतामा राष्ट्रे राजन्यः शूर ऽइषव्योऽतिव्या
धी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः स
प्तिः पुरंधिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य य ८

जमानस्यवीरोजायतान्निकामेनिकामेनः पर्ज्जन्यो
वर्षतुफलवत्योनऽओषधयःपच्यन्तांयोगक्षेमो
नः कल्पताम् ५ सजोषाऽइन्द्रसगणोमरुद्भिः।
सोमम्पिबवृत्रहाशूरविद्वान् जहिशत्रूँ॥रपमृ।
धोनुदस्वाथाभयङ्कृणुहिविश्वतोनः ६ यमाय
त्वामखायत्वासूर्य्यस्यत्वातपसेदेवस्त्वासविता
मध्वानक्तुपृथिव्याःसꣳस्पृशस्पाहि अर्चिरसि
शोचिरसितपोसि ७ कार्षिरसिसमुद्रस्यत्वा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं॰ द्विस्पा॰ उन्नयामि समापो॰ अद्भिरग्मतसमोषधी॥

१९ निरोषधीः ७ विश्वावसो स्वस्ति ते पारमशीय १९

सनःपितेव सून्वे

गने सूपायनोभवः सचस्वानः स्वस्तये १ अपो॰अ

द्यान्वचारिषं रसेन समसृक्ष्महि पयस्वानग्न॰

आगमन्तम्मासं सृज वर्चसा प्रजया च धनेन च॥

२ विदसितयादेवतयाङ्गिरस्वद्ध्रुवासीदपरि॥

विदसितया देवतयाङ्गिरस्वद्ध्रुवासीद २ इदा॥ ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्विष्णुः ४ इन्द्रऽआसान्नेता बृहस्पतिर्द्दक्षिणा
यज्ञः पुरएतुसोमः देवसेनानामभिभञ्जतीनाञ्जय
न्तीनाम्मरुतोयन्त्वग्रम् ५ इन्द्रन्दैवीर्विशोमरु
तोनुवर्त्मानोभवन्यथेन्द्रन्दैवीर्विशोमरुतोनुव
र्त्मानोभवन् एवमिमंयजमानन्दैवीश्चविशो
मानुषीश्चानुवर्त्मानोभवन्तु ६ प्रजापतेनः ७
नमोस्तुसर्प्पेभ्योयेकेचपृथिवीमनु येऽन्तरि
क्षेयेदिवितेभ्यः सर्प्पेभ्योनमः ८ ब्रह्मजज्ञानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं० म० ९ आ नो भद्राः
१० क्रतवो यन्तु विश्वतो दब्धासो ऽ अपरीतास ऽ उद्भि
दः देवानो यथा सदमि द्वृधे असन्न प्रायुवो रक्षितारो
दिवे दिवे १ देवानां भद्रा सुमतिर्ऋजूयतां देवानां
राति रभि नो नि वर्त्तताम् देवानां सख्यमुपसेदि
मा वयं देवान ऽ आयुः प्रतिरन्तु जीवसे २ तान्पू
र्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षम
स्रिधम् अर्य्यमणं वरुणं सोमम श्विना सरस्व १०

19

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीनः सुत्त्रामयस्कृरत ३ तन्नोवातोमयोभुवातु
भेषजन्तन्माताप्टथिवीतत्पिताद्यौः तद्ग्रावाणः सो
मसुतोमयोभुवस्तदश्विनाश्टणतन्धिष्ण्यायुवम्
तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसे
हूमहेवयम् पूषानोयथावेदसामसद्वृधेरक्षिता
पायुरदब्धः स्वस्तये ५ स्वस्तिनऽइन्द्रोवृद्धश्रवाः
स्वस्तिनः पूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्योऽअरि
ष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ६ पृषदश्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰ मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः।
११ यः अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो दे
वाः अवसागमन्निह ७ भद्रं कर्णेभिः शृणुया
म देवा भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरङ्गैस्तुष्टु
वांसस्तनूभिर्व्यशेम देवहितं यदायुः ८
शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं
तनूनां पुत्रासो यत्र पितरो भवन्ति मा नो मध्या
रीरिषतायुर्गन्तोः ९ ११

21

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ गणानान्त्वा गणपतिᳬं हवा
महे प्रियाणान्त्वा प्रियपतिᳬं हवामहे निधीना।
न्त्वा निधिपतिᳬं हवामहे वसोमम आहमजा
निगर्ब्भधमात्त्वमजासि गर्ब्भधम् १ जातवेदसे सु
नवाम सोममरातीयतो निदहाति वेदः सनः पर्ष
दतिदुर्गाणि विश्वा नावेव सिन्धुन्दुरितात्यग्निः
२ वायो ये ते सहस्त्रिणो रथास स्तेभिरागहि नियु
त्वान्त्सोमपीतये ३ घृतङ्घृतपावानः पिवतवसां।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं० साम्व सापा वान्द्रः पिबतान्तरिक्षस्य हविरसि स्वा
१२ हा दिशः प्रदिशऽआदिशो विदिशऽउद्दिशो दि
ग्भ्यः स्वाहा ४ या वाङ्कशा मधुमत्याश्विना सूनृ
तावती तया यज्ञम्मिमिक्षतम् ५ इति पञ्च लो
कपालस्यापनम् ७ अश्विना तेजसा चक्षुः प्रा
णेन सरस्वती वीर्यम् वाचेन्द्रो बलेनेन्द्राय दधु
रिन्द्रियम् १ यमाय त्वा २ अयमग्निः सहस्रि
णो वाजस्य शतिनस्पतिः मूर्द्धा कवी रयीणाम् ३ १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मजज्ञानम्प्रथमम् ४ सोमो धेनुꣳ सोमोऽअर्व
न्तमाशुꣳ सोमो वीरङ्कर्मण्यन्ददाति सादन्यं वि
दथ्यꣳ सभेयम्पितृश्रवणं यो ददाशदस्मै ५
नमस्ते रुद्र मन्यवऽ उतोतऽ इषवे नमः बाहुभ्या
मुत ते नमः ६ अदितिर्द्यौरदितिरन्तरिक्षम
दितिर्माता स पिता स पुत्रः विश्वे देवाऽ अदितिः
पञ्चजनाऽ अदितिर्जातमदितिर्जनित्वम् ७ वा
चस्पतये पवस्व वृष्णोऽ अꣳशुभ्याङ्गभस्तिपूतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० देवोदेवेभ्यः पवस्वयेषाम्भागोसि ८ नमोस्तुसर्पे
१३ भ्य ८ पितृभ्यः स्वधापिभ्यः स्वधानमः पितामहे-
भ्यः स्वधापिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायि
भ्यः स्वधानमः अक्षन्पितरोमीमदन्तपितरोतीतृ
पन्तपितरः शुन्धध्वम् १० अग्नप्रणेतञ्जगसत्पर
धेत्वगेमाल्विषयमुदवाददन्तः त्वगप्रन्तोजनयाणो
त्रिरस्के ञ्जगप्रन्तजिन्दवन्तः स्याम ११ दैव्यावध्व
र्यूः आगतः रथेनसूर्यत्विचा मध्वायज्ञंसमञ्जा १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थे तम्प्रत्नक थाय म्हिन श्चिवन्दे वानाम् १२ विश्वा

इ्‌ हत्पिवतु सोम्प म्मध्वायुर्दधघ्यज्ञपतावविकुत

म् वातजूतोयोऽ अभिरक्षति त्मनाप्रजाः पुपोषपु

रुधाविराजति १३ त्वष्टातुरीपोऽ अद्भुतऽ इन्द्राग्नी

पुष्टिवर्द्धना द्विपदाछन्दऽ इन्द्रियमुक्षागौर्न्नवयोद

धुः १४ पीवोऽ अन्नारयिवृधः सुमेधाः श्वेतः सिष

क्तिनियुतामभिश्रीः तेवायवेसमनसोवितस्थुः

र्विश्वेन्नरः स्वपत्यानिचक्रुः १५ इन्द्राग्नीऽ आगत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं० ं सुतङ्गीर्भिर्न्नृतमो वरेण्यम् अस्यपातन्धियेषिता
१४ १६ नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृ
तꣳ सपर्य्यत दूरेदृशे देवजाताय केतवे दिवस्पु
त्राय सूर्य्याय शꣳसत १७ सꣳसृष्ट हस्तैः स निषङ्गि
भिर्वशी सꣳस्रष्टा स युध ऽइन्द्रो गणेन सꣳसृष्टजि
त्सोमपा बाहुशर्द्ध्युग्रधन्वा प्रतिहिताभिरस्ता १८
माते व्यथिष्ट पृथिवी परीष्यमग्निꣳ स्वयोनावब्भा
रुपा तान्विश्वे देवैर्ऋतुभिः सम्विदानः प्रजापति १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिर्विश्वस्य कर्म्मा विमुञ्चतु १९ अपाघमपकिल्विषम
पकृत्यामपोरपः अपामार्गत्वमस्मदपदुःस्वप्न्यं
सुवः २० विश्वेऽअद्य मरुतो विश्वऽऊती विश्वे भ
वन्त्वग्नयः समिद्धाः विश्वे नो देवाऽअवसागमन्तु वि
श्वमस्तु द्रविणं वाजोऽअस्मे २१ तत्सवितुर्व
रेण्यम्भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्
२२ इदन्विष्णुः२व्र वसोपवित्रमसि शतधारंव
सोःपवित्रमसि सहस्रधारम् देवस्त्वा सविताउना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० तुवसोः पवित्रेण शतक्षारेण सुप्वाकामधुक्षः २४
१५ वरुणस्योत्तम्नानम् २५ उतनोदिर्बुध्न्यःशृणोत्व
जऽ एकपात्पृथिवी समुद्रः विश्वेदेवाऽऋतावृधो
हुवानास्तुतामन्त्राः कविशस्ताऽअवन्तु २६
शिवोनामासि स्वधितिस्तेपितानमस्तेऽअस्तुमा
माहिंसीः निवर्त्तयाम्यायुषेन्नाद्याय प्रजनना
यरायस्पोषाय सुप्रजास्त्वाय सुवीर्याय २७ प्र
पन्तव हुते ह्वयन्नरिष्येम कदाचन स्तोतारस्तेऽ १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदस्मासि २० इतिनक्षत्रस्थापनम् ८ योगेयोगे
तवस्तर म्वाजेवाजेहवामहे सखायऽइन्द्रमूतये
१ नद्रुद्भुलैंग्निः २ ध्रुवासिध्रुवोयंय्यजमानो
स्मिन्नायतनेप्रजयापशुभिर्न्भूयात् घृतेनद्यावा
पृथिवीपूर्य्येथामिन्द्रस्यछदिरसिविश्वजनस्यछाया
३ पञ्चनद्यःसरस्वतीमपियन्तिसस्त्रोतसःसर
स्वतीतुपञ्चधासोदेशेभवत्सरित् ४ सप्तऽऋष
यःप्रतिहिताःशरीरेसप्तरक्षन्तिसदमप्रमादम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं० सप्ताप: स्वपतोलोकमीयुस्तत्रजागृतोऽअस्वप्न
१६ जौसत्रसदौच देवौ ५ इमंमे वरुणश्रुधीहव
मद्याचमृडय त्वामवस्युराचके ६ उपह्वरेस्या
नृचक्षसस्पृष्ठान्नावश्चरन्ति स्वस्तिचऽइच्छयानाः ता
ऽआववृतन्नधराऽउदक्ताःऽअहिं बुध्न्यमनुरीयमा
णाः विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तम
सि विष्णोः क्रान्तमसि ७ जवोय स्तो वाजिन्नि दि
तो गुल्फाय: श्येनेपरीत्तोऽअचरस्ववाते तेननोवा १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जिन्वले वान्वलेन वाजजिघ्नव समनेचपारयि

ष्णु: वाजिनो वाजजितो वाज६ सरिष्यन्तो वृहस्पते

र्भागमवजिघ्रत ॥ सुपर्णो सिगरुत्मान्खिदते।

शिरोगायत्रञ्चक्षुर्वृहद्रथन्तरेपक्षौ स्तोम आत्मा

छन्दांसिस्य ड्गानियजूंषिनाम सामतेतनूर्वामदे

व्यं यज्ञायज्ञियम्पुच्छन्धिष्ण्या: शफा: सुपर्णो सिग

रुत्मान्दिवङ्गच्छस्व:पत। ॥ असंख्याता सहस्रा

णियेरुद्रा अधिभूम्याम् तेषाम्सहस्रयोजनेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु० धन्वानितन्नमसि १० सहस्रशीर्षा पुरुषः सहस्रा
१७ क्षःसहस्रपात् सभूमिꣳसर्वतस्पृत्वात्यतिष्ठद्दशा
ङ्गुलम् ११ वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशो
ऽअनमीवोभवानः यत्त्वेमहेप्रतितन्नोजुषस्वशन्न
नोऽअस्तुद्विपदेशञ्चतुष्पदे १२ अमीवहावा
स्तोष्पतेविश्वारूपाण्याविवेशन् सखासुशे
वऽएधिनः १३ गणानान्त्वा १४ नमोस्तुसर्प्पेभ्यः
१५ जातवेदसेसुनः १६ प्रजापतेन १७ योवःशि १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वतमोर सस्तस्पन्नाजयतेव्हनः उन्नातीरिवमातरः १०
इतिध्रुवादिस्थापनम् ९९ अग्निमीळेपुरोहितंयज्ञ
स्यदेवमृत्विजम् होतारं रत्नधातमम् १ इषेत्वो
र्जेत्वा वायवस्थ देवोवः सविता प्रार्पयतुश्रेष्ठतमा
यकर्म्मणः आप्यायध्वमघ्न्याः इन्द्रायभागम्प्रजाव
तीरनमीवाः अयक्ष्मामावस्तेनः ईशतमाघशंसो
ध्रुवाः अस्मिन्गोपतौस्यात बह्वीर्यजमानस्यपशू
न्पाहि २ अग्नः आयाहिवीतयेगृणानोहव्यदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० तये निहोतासत्सि बर्हिषि ३ शन्नोदेवी ४ इति
१८ वेदादिस्थापनम् १० त्रातारमिन्द्रमवितारमिन्द्र
८ हवेहवे सुहव७ शूरमिन्द्रम् ह्वयामि शक्रं पुरु ४१
ह्तमिन्द्र७ स्वस्तिनोमघवाधात्विन्द्रः १ त्वन्नोऽअ
ग्नेतवदेवपायुभिर्मघोनो रक्षतन्वश्च वन्द्य त्रा
ता तोकस्य तनये गवामस्य निमेष७ रक्षमाणस्तव व्र
ते २ सुगन्नः पन्थ्या मभयं कृणोतु यस्मिन्नक्षेत्रे अभ्येति वस्यः
धेह्यजरन्नः आयुः अपैतुमृत्युरमृतन्नः आ १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गा॰वैवस्वतोनो॰ अनयद्धरुणोत्तुस्स्वाहा २ अस्

न्वन्तमयजमानमिछन्स्तेनसेत्त्वामन्विदितस्कारस्य

अन्यमस्मादिञ्चसात॰ इत्यानमोदेविविर्कृनेतुभ्य

मस्तु ४ तत्वायामिब्रह्मणवन्दमानस्तदाशास्ते

यजमानोहविर्भिः अहेडमानोवरुणेहवोध्युरुश

ं समानः आयुष्वमोषीः ५ आनोनिभुङ्भिःशाति

नाभिरहर ं सदस्विणीनिरुपयादियज्ञम् बा॰

यो॰ अस्मिन्स्वनेमादयस्वयूयमातस्वस्तिभिः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं० सदानः ६ वयꣳसोम व्रतेतव मनस्तनूषुबिभ्र
१९ तः प्रजावन्तः सचेमहि ७ तमीशानम् ८ अ
स्मेरुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ स
जोषाः यं शꣳसते स्तुवते धायिपज्रऽ इन्द्रज्येष्ठा
ऽअस्माꣳऽअवन्तु देवाः ९ सोमाधिपति १० इ
ति दिक्पालस्थापनम् १० चित्तिं जुहोमि मनसा घृ
तेन यथा देवाऽइहागमन्वीतिहोत्राऽऋतावृधः प
त्ये विश्वस्य मन्मनो जुहोमि विश्वकर्मणे विश्वा १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हादाश्रुऽहवि। १७ सप्त ते ऽअग्ने समिधः सप्त
जिह्वाः सप्त ऽऋषयः सप्त धाम प्रियाणि सप्त हो
त्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन
स्वाहा २ शुक्रज्योतिश्च ३ ईदृङ्न्यादृङ् सदृ
ङ् मितश्च सम्मितश्च सभराः ४ ऋतश्च सत्यश्च
ध्रुवश्च धरुणश्च धर्त्ता चा विधर्त्ता च विधारयः ५
ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च अन्तिमित्र
श्च दूरे ऽअमित्रश्च गणः ६ ईदृक्षास ऽएतादृक्षास

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० ऽऽक्षणः सहस्रासः प्रतिसहस्रासऽएतत्र मिताप्त
२० श्च सम्मिता सोमो ऽअद्यसन्तर सोमह तोयद्दे ऽअ
स्मिन् ७ स्वतवाँश्च प्रघासीच सान्तपनश्च गृह
मेधीच क्रीडीचशाकीचोज्जेषी ८ उग्रश्च भीम
श्च ध्वान्तश्च धुनिश्च सासह्वाँश्चाभियुग्वाचवि
क्षिपः स्वाहा ९ भुनस्त्वादित्यारुद्रा वसवः समि
न्धतां पुनर्ब्रह्माणो वसुनीथयज्ञैः घृतेनत्वन्तन्वं
वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः १० आयु॰ २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जमदग्नेः कस्यपस्य त्र्यायुषम् यद्देवेषु त्र्यायुष
न्तन्नो अस्तु त्र्यायुषम् ॥ इति पूर्णजातिः १२ द
न्तन्देवाः १ इमꣳ स्तनमूर्जस्वन्तन्धयापाम्प्रपीन
मग्ने सरिरस्य मध्ये उत्सञ्जुषस्व मधुमन्तमर्वन्त्समु
द्रियꣳ सदनमाविशस्व २ घृतम्मिमिक्षे घृतमस्य
योनिर्घृते श्रितो घृतम्वस्य धाम अनुष्वधमावह
मादयस्व स्वाहा कृतं वृषभ वक्षि हव्यम् ३ समुद्रा
दूर्मिर्मधुमाꣳ उदारदुपाꣳशुना सममृतत्वमान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं० ट् घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृत।
२१ स्य नाभिः ४ वयं नाम प्र ब्रवामा घृतस्यास्मिन्य
ज्ञे धारया मा नमोभिः उप ब्रह्मा शृणवच्छस्यमान
ञ्चतुःशृङ्गोवमी द्गौरऽएतत् ५ चत्वारि शृङ्गा त्र
योऽअस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य त्रिधा
बद्धो वृषभो रोरवीति महो देवो मर्त्याँ२ऽआविवे
शा ६ त्रिधा हितम्पणिभिर्गुह्यमानङ्गवि देवासो
घृतमन्वविन्दन् इन्द्रऽएकं सूर्यऽएकञ्जजान २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदादेकं स्वधयानिष्टतक्षुः एताऽ अर्षन्ति हृद्या
त्समुद्राछतव्रजारिपुणानावचक्षे घृतस्य धाराऽ अ
भिचाकशीमि हिरण्ययो वेतसो मध्यऽ आसाम् ५ स
म्यक्स्रवन्ति सरितोन धेनाऽ अन्तर्हृदा मनसा पूयमा
नाः एतेऽ अर्षन्त्यूर्मयो घृतस्य मृगाऽ इव क्षिपणोरीष
माणाः ६ सिन्धोरिव प्राध्वने शूघनासो वातप्रमि
यः पतयन्ति यह्वाः घृतस्य धाराऽ अरुषोन वाजीका
ष्ठाभिन्दन्नूर्मिभिः पिन्वमानः ७ अभिप्रवन्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं० समनेवयोषाः कल्याण्यः स्मयमानासोऽअग्निम्
२२ घृतस्यधाराः समिधोनसन्त ताजुषाणोहर्य्यतिजात
वेदाः ११ कन्याऽइव वहतुमेतवाऽउ अञ्ज्यञ्जाना
ऽअभिचाकशीमि यत्रसोमः सूयतेयत्रयज्ञोघृत
स्यधाराऽअभितत्पवन्ते १२ अभ्यर्षतसुष्टुतिंगव्य
माजिमस्मासुभद्राद्रविणानिधत्त इमंयज्ञन्नयत
देवतानाघृतस्यधारामधुमत्पवन्ते १२ धामन्तेवि
श्वम्भुवनमधिश्रितमन्तः समुद्रेहृद्यन्तरायुषि। २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपामग्नीके समिधेयऽआन्तस्तं मरुपाममन्थुमन्त

न्तऽऊर्म्मिम् १४ चत्वारिंशच्च चत्वारिंशच्च वाऽआंपश्च

त्रिरेवच । क्रियतेवचनंच आज्ञान्त स्तै यज्ञात्मनेन

मः ११ ज्ञानतोऽज्ञानतो वापि मंत्रकर्म क्रियाविधिः

संपूर्णं कुरु यज्ञेश गायत्र्यस्तु नमोस्तु ते २ यथाद्या

स्त्रप्रहाराणां कवचं भवति वारणम् तद्देवोपघा

तानां शान्तिर्भवति वारणं ३ इति वैश्वानरस्तुतिः

१२ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८० हेरणायचक्षसे १ योवःशिवतमोरसस्तस्यभाज
१२ यतेहनः उशतीरिवमातरः २ तस्माऽअरङ्गमा
मवोयस्यक्षयायजिन्वथ आपोजनयथाचनः ३
त्रातारमिन्द्रम् ४ वरुणस्योत्तम्भनम् ५ वगप्सुणे
तः ६ इदमापः प्रवहतावद्यञ्चमलञ्चयत् यच्चा
भिदुद्रोहानृतंयच्चशेपेऽअभीरुणम् आपोमात
स्मादेनसः पवमानश्चमुञ्चतु ७ मुमुक्षयत्वा वा
तायस्वाहा शरिरायत्वावातायस्वाहा अनाधृष्या १२

45

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्त्वा वातायस्वाहा प्रतिधृष्ण्यायत्त्वा वातायस्वाहा
८ पुनन्तुमादेवजनाः ९ आप्यायस्व समेतुतेवि
श्वतः सोमवृष्ण्यम् भवा वाजस्य सङ्गथे १० शिरोमे
श्रीर्यशो मुखंत्विषिः केशाश्च श्मश्रूणि राजामे
प्राणो अमृतं सम्राड्चक्षुर्विराट्श्रोत्रम् ११ जिह्वामे
भद्रं वाङ्महो मनो मन्युः स्वराड्भामः मोदाः प्रमोदाः
अङ्गुलीरङ्गानि मित्रम्मे सहः १२ बाहूमे बलमिन्द्रिय
ं हस्तौमे कर्म वीर्यम् आत्मा क्षत्रमुरो मम १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृष्टीर्मेराष्ट्रमुदरमंसौ ग्रीवाश्च श्रोणी ऊरू अर
त्नीजानुनी विशोमेङ्गानि सर्वतः १४ नाभिर्मे चित्तं
विज्ञानं पायुर्मेपचितिर्भसत् आनन्दनन्दावाण्डौ
मेभगः सौभाग्यं पसः जङ्घाभ्यां पद्भ्यां धर्मोस्मि वि
शिराजाप्रतिष्ठितः १५ पयः पृथिव्यां पय ओषधीषु प
योदिव्यन्तरिक्षे पयोधाः पयस्वतीः प्रदिशः सन्तु मह्य
म् १६ देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्याम्पू
ष्णोहस्ताभ्याम् सरस्वत्यै वाचोयन्तुर्यन्त्रियेदधामि २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बृहस्पतेष्ट्वा साम्म्राज्येनाभिषिंचाम्यसौ १७ देवस्य

त्वा सवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्

सरस्वत्यै वाचो यन्तुर्यन्त्रियेणाग्नेः साम्म्राज्येनाभिषिंचामि

१८ देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णो

हस्ताभ्याम् सरस्वत्यै वाचो यन्तुर्यन्त्रियेणाग्नेः साम्म्राज्ये

नाभिषिंचामि अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्च

सायाभिषिंचामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्याया

भिषिंचामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसे भिषि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं॰ स्वामि १९ पालासंस्रवति तेन ब्राह्मणेनाभिषिञ्चति
२५ ब्रह्म वै पालाशो ब्रह्मणैवैनमेतदभिषिञ्चति २०
सर्वेषां वा ऽएष वेदानाᳫं रसो यत्साम सर्वेषामेवैनमे
तद्वेदानाᳫं रसेनाभिषिञ्चति २१ यद्वेव कल्पाञ्जु-
होति प्राणा वै कल्पा ऽअमृतमु वै प्राणा ऽमृतेनैवैनमे
तदभिषिञ्चति २२ दीर्घायित्वाय वर्चसे सुप्रजा-
स्त्वाय सहस्रा ऽअथो जीवशारदः शतम् २३ द्यौः शां
न्तिरन्तरिक्षᳫं शान्तिः पृथिवी शान्तिरापः शान्तिरोषध २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्र
ह्मशान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सामा शा
न्तिरेधि २७ इतिअमृताभिषेकोक्तः १७ श्रीवर्द्ध
स्वमायुष्यमारोम्भिकामपमाविधात्पवमानमह्यायतेधा
न्यंधनमपुत्रवकपुत्रलाभंशतसम्वत्सरंदीर्घमायुः
१ पुत्रमिवपितराववश्विनोभेन्द्रवपुः काव्यैर्दंसं
नाभिः यत्सुरामंव्यपिबः शचीभिः सरस्वतीत्वामघव
न्नभिष्णक् २ काम्यक्षामडधेऽस्वभित्रायवरुणा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं॰ यच इन्द्रायाग्निभ्यामन्नेभ्यो प्रजाभ्यः ऽउषधीभ्यः ३
२६ अथ पूर्वार्द्धे दक्षिणा कामं छामं उपे धुन्वन्मित्रायव ना॰
रुणाय च इन्द्रायाग्निभ्यामन्नेभ्यो प्रजाभ्यः ऽउषधीभ्य
ऽइति सर्व्व देवत्या वै करुषिरेताभ्यो देवताभ्यः सर्वा
न्कामान्धुन्वन्ति ४ अथ सुमङ्गलनामानं ह्वयति ब
डाकारश्चे स्करत्यस्करेतियऽ एवन्नामा भवति क
ल्याणमेवैतन्नामऽ उष्ये वाचो वदति ५ ते वै देवास्त
न्नाविदुर्यद्येनं ६ सर्वं वा ऊर्बल्लवा सर्वल्लवा सर्वं २६

यद्यति वा स्विंचयन्न वा आपयँस्त ऽ एताम्‍रचमपश्यन्था

मब दग्निरिन्द्रोबृहस्पती देवो बृहस्पतिः सचेतसो हि

श्वे देवा यज्ञं प्रावन्तु नः शुभ ऽ इति ६ इमा मे ऽ अग्न

ऽ इष्टका धेनवः सन्त्वेका च दश च दश च शतञ्च स

हस्रञ्च सहस्रञ्चायुतञ्चायुतञ्च नियुतञ्च प्रयुत

ञ्चार्बुदञ्च न्यर्बुदञ्च समुद्रश्च मध्यञ्चान्तश्च परार्द्ध

श्चैता मे ऽ अग्न ऽ इष्टका धेनवः सन्त्वमुत्रामुष्मिँल्लो

के ७ विवस्वनादित्यैष ते सोमपीथस्तस्मिन्मत्स्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं०
२७ श्रदस्मैनरोवचसेदधातनयदाशीर्द्दम्पतीवाम
मश्नुतः उमान्सुवोजायतेविन्दतेवसुधाविश्वाहा
रपऽएधतेगृहे ८ अग्नेगृहपते सुगृहपतिस्त्वया
ग्नेहङ्गृहपतिनाभूयासं सुगृहपतिस्त्वम्मयाग्ने
गृहपतिनाभूयाः अस्थूरिणौगार्हपत्यानिसन्तुशत
ंहिमाः सूर्य्यस्यावृतमन्वावर्त्ते ९ धन्वनागाधन्व
नाजिञ्जयेम धन्वनातीव्राः समदोजयेम धनुःशत्रोर
पकामङ्कृणोतिधन्वनासर्वाः प्रदिशोजयेम ९ वि २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वानिदेव सवितर्दुरितानिपरासुव यद्भद्रन्तन्नआ
सुव ११ तस्यैसम्प्रश्रासानि धेन्वोभवन्ति सधन्तावा
ज्यान्नागौ सदेवा वरुन्धे विश्वानिदेवसवितः सयानो
देवः सवितासगावेत्तु पाष्ठं श्रुद्धविषोयाज्यानुवाक्या
केषुऽअनुष्टुभौ संयाज्येरजतंऽहिरण्यन्दक्षिणानानारू
पतायाऽअप्पोऽनरका मायानपङ्क्तमाय शतमानम्भव
तिशतायुर्वैपुरुषः शतेन्द्रियऽआयुरेवेन्द्रियंवीर्यमा
त्मन्धत्ते १२ मंत्रार्थाः सफलाः संतु पूर्णाः सन्तु मनोर।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या: शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयोऽस्तव १ ऋ
ग्वेदोऽथ यजुर्वेदः सामवेदस्त्वथर्वणः ब्रह्मवर्चस
दानित्यं दन्ते तव राघवः २ अदत्त्वा विप्रहस्तेषु
नित्यं वन्दन्ति ये नरा चत्वारो वृद्धिमायान्तु आयुः कीर्ति
र्यशो बलम् ३ तिष्ठ ब्रह्मण स्पते देवयन्तस्त्वेम
हे उपप्रयन्तु मरुतः सुदानवऽइन्द्र प्राशूर्भवा सचा
१२ गणानां त्वा स्त्रे हं मात्त संसारवादनम् गच्छ ब्रह्माद
यो देवा तत्र गच्छन्तु ज्ञानासनम् १४

K K S U LIBRARY
RAMTEK
441 106
M-1403
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=16.10.20 12:21
,TRANSFERRED=2020/10/16 at 12:27:37
,PAGES=55
,TYPE=STD
,NAME=S0004043
,Book Name=M-1403-DANDAK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection